## बहुव्रीहेश्चान्तोदात्तात् । (५२/५०८)

क्तात् इत्येव । बहुव्रीहिर्योऽन्तोदात्तः,[1] तस्मात् स्त्रियां ङीष् प्रत्ययो भवति । [2]स्वाङ्गपूर्वपदो बहुव्रीहिरिहोदाहरणम् । अस्वाङ्गपूर्वपदाद् (४.१.५३/५०९) विकल्पं वक्ष्यति । शङ्खभिन्नी । ऊरुभिन्नी । [3]गलकोत्कृत्ती । [4]केशलूनी । बहुव्रीहेः इति किम् ? पादपतिता ।

[३५९] अन्तोदात्ता[5]ज्जातप्रतिषेधः । (म. भा. २.२२१)

दन्तजाता । स्तनजाता ।

[३६०] पाणिगृहीत्यादीनामर्थविशेषे । (म. भा. २.२२१)

पाणिगृहीती भार्या । यस्यास्तु कथञ्चित् पाणिर्गृह्यते पाणिगृहीता सा भवति (म. भा. २.२२१) ।

[३६१] अबहुनञ्सुकालसुखादिपूर्वादिति वक्तव्यम् । (म. भा. २.२२२)

बहुकृता । नञ् – अकृता । सु – सुकृता । काल – मासजाता । संवत्सरजाता । [6]सुखादि – सुखजाता । दुःखजाता । 'जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः' (६.२.१७०/३९०४) [7]इत्येवमादिना बहुव्रीहेरन्तोदात्तत्वम् ॥

## अस्वाङ्गपूर्वपदाद् वा । (५३/५०९)

अन्तोदात्तात् क्तात् इति अनुवर्तते । अस्वाङ्गपूर्वपदाद् अन्तोदात्तात् क्तान्ताद् बहुव्रीहेः स्त्रियां वा ङीष् प्रत्ययो भवति । पूर्वेण नित्ये प्राप्ते विकल्प उच्यते । शार्ङ्गजग्धी, शार्ङ्गजग्धा । पलाण्डुभक्षिती, पलाण्डुभक्षिता । सुरापीती, सुरापीता । अस्वाङ्गपूर्वपदात् इति किम् ? शङ्खभिन्नी । ऊरुभिन्नी । अन्तोदात्तात् इत्येव, वस्त्रच्छन्ना । वसनच्छन्ना ।

[३६२] बहुलं सञ्ज्ञाछन्दसोरिति वक्तव्यम् ।

[8]प्रवृद्धविलूनी, प्रवृद्धविलूना । प्रवृद्धा चासौ विलूना च इति । नायं बहुव्रीहिः ॥

## स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् । (५४/५१०)

बहुव्रीहेः क्तान्तादन्तोदात्तात् इति सर्वं निवृत्तम् । वाग्रहणमनुवर्तते । स्वाङ्गं यदुपसर्जनमसंयोगोपधं तदन्तात् प्रातिपदिकात् स्त्रियां वा ङीष् प्रत्ययो भवति । चन्द्रमुखी, चन्द्रमुखा । अतिक्रान्ता केशान् अतिकेशी,[9] अतिकेशा माला (म. भा. २. २२३) । स्वाङ्गात् इति किम् ? बहुयवा । उपसर्जनात् इति किम् ? [10]अशिखा । असंयोगोपधात् इति किम् ? [11]सुगुल्फा । [12]सुपार्श्वा ।

---

1. क्तान्तः इत्यधिकम् इ. क. ड. ह. 2. स्वाङ्गपूर्वः इहोदाहरणम् ह. 3. गलबालान्नी इ, गलोत्कृत्ती ब. 4. केशविलूनी क. 5. जात नास्ति फ. 6. सुखादीनाम् फ. 7. इत्यादिना फ. ब. 8. वृद्धविलूनी, वृद्धविलूना फ. 9. इति तत्पुरुषः इत्यधिकम् क. ड. 10. आशिला ब, बहुशिखा क, सुशिखा ड. 11. अगुल्फा ह. 12. नास्ति ब, सुपर्वा, अङ्गपार्श्वा ह.